अथ श्रीहरिप्रियाप्रकरणम्

हरेः साधारणगुणैरुपेतास्तस्य वल्लभाः।
पृथुप्रेम्णां सुमाधुर्यसम्पदाञ्चाग्रिमाश्रयाः॥ १॥

यथा

प्रणमामि ताः परममाधुरीभृतः
कृतपुण्यपुञ्जरमणीशिरोमणीः।
उपसन्नयौवनगुरोरधीत्य याः
स्मरकेलिकौशलमुदाहरन्हरौ॥ २॥

स्वकीयाः परकीयाश्च द्विधा ताः परिकीर्तिताः॥ ३॥

तत्र स्वकीयाः

करग्रहविधिं प्राप्ताः पत्युरादेशतत्पराः।
पातिव्रत्यादविचलाः स्वकीयाः कथिता इह॥ ४॥

यथा

सुनिर्माणे धर्माध्वनि पतिपराभिः परिचिते
मुदा बद्धश्रद्धा गिरि च गुरुवर्गस्य परितः।
गृहे याः सेवन्ते प्रियमपरतन्त्राः प्रतिदिनं
महिष्यस्ताः शौरेस्तव मुदमुदग्रां विदधतु॥ ५॥

यथा वा श्रीदशमे (10.60.55)

न त्वादृशीं प्रणयिनीं गृहिणीं गृहेषु
पश्यामि मानिनि यया स्वविवाहकाले।
प्राप्तान्नृपान्न विगणय्य रहोहरो मे
प्रस्थापितो द्विज उपश्रुतसत्कथस्य॥ ६॥

तास्तु श्रीयदुवीरस्य सहस्राण्यस्य षोडश।
अष्टोत्तरशताग्राणि द्वारवत्यां सुविश्रुताः॥ ७॥

आसां सख्यश्च दास्यश्च प्रत्येकं स्युः सहस्रशः ।
तुल्यरूपगुणाः सख्यः किञ्चिन्न्यूनास्तु दासिकाः ॥ ८ ॥

तत्रापि रुक्मिणी सत्या जाम्बवत्यर्कनन्दिनी ।
शैब्या भद्रा च कौशल्या माद्रीत्यष्टौ गणाग्रिमाः ॥ ९ ॥

तत्रापि रुक्मिणीसत्ये वरीयस्यौ प्रकीर्तिते ।
ऐश्वर्याद्रुक्मिणी तत्र सत्या सौभाग्यतो वरा ॥ १० ॥

तथा हि हरिवंशे

कुटुम्बस्येश्वरी यासीद्रुक्मिणी भीष्मकात्मजा ।
सत्यभामोत्तमा स्त्रीणां सौभाग्ये चाधिकाभवत् ॥ ११ ॥

पाद्मे (6.88.28) च कार्त्तिकमाहात्म्ये तां प्रति श्रीकृष्णवाक्यं

न मे त्वत्तः प्रियतमा काचिदन्या नितम्बिनी ।
षोडशस्त्रीसहस्राणां प्रिये प्राणसमा ह्यसि ॥ १२ ॥

अनयोः सकलोत्कृष्टाः सख्यो दास्यश्च लक्षशः ।
स्वीयाजातीयभावेन निखिला एव भाविताः ॥ १३ ॥

याश्च गोकुलकन्यासु पतिभावरता हरौ ।
तासां तद्वृत्तिनिष्ठान्न स्वीयात्वमसाम्प्रतम् ॥ १४ ॥

यथा

आर्या चेदतिवत्सला मयि मुहुर्गोष्ठेश्वरी किं ततः
प्राणेभ्यः प्रणयास्पदं प्रियसखीवृन्दं किमेतेन मे ।
वैकुण्ठाटवीमण्डलीविजयी चेद्वृन्दावनं तेन किं
दीव्यत्यत्र न चेदुमाव्रतफलं पिच्छावतंसी पतिः ॥ १५ ॥

गान्धर्वरीत्या स्वीकारात्स्वीयात्वमिह वस्तुतः ।
अव्यक्तत्वाद्विवाहस्य सुष्ठु प्रच्छन्नकामता ॥ १६ ॥

अथ परकीया

रागेणैवार्पितात्मनो लोकयुग्मानपेक्षिणा।
धर्मेणास्वीकृता यास्तु परकीया भवन्ति ताः॥ १७॥

यथा

रागोल्लासविलङ्घितार्यपदवीविश्रान्तयोऽप्युद्धुर-
श्रद्धारज्यदरुन्धतीमुखसतीवृन्देन वन्द्येहिताः।
आरण्या अपि माधुरीपरिमलव्याक्षिप्तलक्ष्मीश्रियस्
तास्त्रैलोक्यविलक्षणा ददतु वः कृष्णस्य सख्यः सुखम्॥ १८॥

कन्यकाश्च परोढाश्च परकीया द्विधा मताः।
व्रजेशव्रजवासिन्य एताः प्रायेण विश्रूताः।
प्रच्छन्नकामता ह्यत्र गोकुलेन्द्रस्य सौख्यदा॥ १९॥

तथा हि रुद्रः (śṛṅgāratilake, 2.30)

वामता दुर्लभत्वं च स्त्रीणां या च निवारणा।
तदेव पञ्चबाणस्य मन्ये परममायुधम्॥ २०॥

विष्णुगुप्तसंहितायां च

यत्र निषेधविशेषः सुदुर्लभत्वं च यन्मृगाक्षीणाम्।
तत्रैव नागराणां निर्भरमासज्जते हृदयम्॥ २१॥

आः किंवान्यद्यतस्तस्यामिदमेव महामुनिः।
जगौ पारमहंस्याञ्च संहितायां स्वयं शुकः॥ २२॥

यथा श्रीदशमे (10.33.19)

कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः।
रेमे स भगवांस्ताभिरात्मारामोऽपि लीलया॥ २३॥

वर्तितव्यं शमिच्छद्भिर्भक्तवन्न तु कृष्णवत्।
इत्येवं भक्तिशास्त्राणां तात्पर्यस्य विनिर्णयः॥ २४॥

रामादिवद्वर्तितव्यं न क्वचिद्रावणादिवत्।
इत्येष मुक्तिधर्मादिपराणां नय ईर्य्यते ॥ २५॥

तथा च तत्रैव (10.33.31, 36)

नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः।
विनश्यत्याचरन्मौढ्याद्यथारुद्रोऽब्धिजं विषम्॥ २६॥

अनुग्रहाय भक्तानां मानुषं देहमाश्रितः।
भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत्॥ २७॥

श्रीमुखेन तु माहात्म्यमासां प्राह स्वयं हरिः॥ २८॥

यथा तत्रैव (10.32.22)

न पारयेऽहं निरवद्यसंयुजां
स्वसाधुकृत्यं विबुधायुषापि वः।
या माभजन्दुर्जरगेहशृङ्खलाः
संवृश्च्य तद्वः प्रतियातु साधुना॥ २९॥

उद्धवोऽपि जगौ सुष्ठु सर्वभागवतोत्तमः॥ ३०॥

यथा (bhāg. 10.47.61)

आसामहो चरणरेणुजुषामहं स्यां
वृन्दावने किमपि गुल्मलतौषधीनाम्।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम्॥ ३१॥

मायाकलिततादृक्स्त्रीशीलनेनानसूयुभिः।
न जातु व्रजदेवीनां पतिभिः सह सङ्गमः॥ ३२॥

तथा हि श्रीदशमे (10.33.37)

नासूयन्खलु कृष्णाय मोहितास्तस्य मायया।
मन्यमानाः स्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः॥ ३३॥

तत्र कन्यकाः

अनूढाः कन्यकाः प्रोक्ताः सलज्जाः पितृपालिताः।
सखीकेलिषु विस्रब्धाः प्रायो मुग्धागुणान्विताः॥ ३४॥

तत्र दुर्गाव्रतपराः कन्या धन्यादयो मताः।
हरिणा पूरिताभीष्टास्तेन तास्तस्य वल्लभाः॥ ३५॥

यथा

विस्रब्धा सखि धूलिकेलिषु पटासंवीतवक्षःस्थला
बालासीति न वल्लवस्तव पिता जामातरं मृग्यति।
त्वन्तु भ्रान्तविलोचनान्तमचिरादाकर्ण्य वृन्दावने
कूजन्तीं शिखिपिच्छमौलिमुरलीं सोत्कम्पमाघूर्णसि॥ ३६॥

अथ परोढाः

गोपैर्व्यूढा अपि हरेः सदा सम्भोगलालसाः।
परोढा वल्लभास्तस्य व्रजनार्योऽप्रसूतिकाः॥ ३७॥

यथा पद्यावल्याम् (312)

कात्यायनी कुसुमकामनया किमर्थं
कान्तारकुक्षिकुहरं कुतुकाद्गतासि।
सद्यस्तनं स्तनयुगे तव कण्टकाङ्कं
पत्युः स्वसा सखि सशङ्कमुदीक्षतेऽसौ॥ ३८॥ *

एताः सर्वातिशायिन्यः शोभासाद्गुण्यवैभवैः।
रमादिभ्योऽप्युरुप्रेममाधुर्यभरभूषिताः॥ ३९॥

तथा श्रीदशमे (10.47.60)

नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः
स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठ-

लब्धाशिषां य उदगाद्व्रजवल्लभीनाम् ॥ ४० ॥

तास्त्रिधा साधनपरा देव्यो नित्यप्रियास्तथा ॥ ४१ ॥

तत्र साधनपराः

स्युर्यौथिक्यस्त्वयौथिक्य इति तत्रादिमा द्विधा ॥ ४२ ॥

तत्र यौथिक्यः

यौथिक्यस्तत्र संभूय गणशः साधने रताः ।
द्विविधास्तास्तु मुनयस्तथोपनिषदो मताः ॥ ४३ ॥

तत्र मुनयः

गोपालोपासकाः पूर्वमप्राप्ताभीष्टसिद्धयः ।
चिरादुद्बुद्धरतयो रामसौन्दर्यवीक्षया ॥ ४४ ॥

मुनयस्तन्निजाभीष्टसिद्धिसम्पादने रताः ।
लब्धभावा व्रजे गोप्यो जाताः पाद्म इतीरितम् ॥ ४५ ॥

कथाप्यन्या किल बृहद्वामने चेति विश्रुतिः ।
सिद्धिं कतिचिदेवासां रासारम्भे प्रपेदिरे ।
इति केचित्प्रभाषन्ते प्रकटार्थानुसारिणः ॥ ४६ ॥

अथ उपनिषदः

समन्तात्सूक्ष्मदर्शिन्यो महोपनिषदोऽखिलाः ।
गोपीनां वीक्ष्य सौभाग्यमसमोर्ध्वं सुविस्मिताः ॥ ४७ ॥

तपांसि श्रद्धया कृत्वा प्रेमाढ्या जज्ञिरे व्रजे ।
वल्लव्य इति पौराणी तथौपनिषदी प्रथा ॥ ४८ ॥

अथायौथिक्यः

तद्भावबद्धरागा ये जनास्ते साधने रताः ।

तद्योग्यमनुरागौघं प्राप्योत्कण्ठानुसारतः ॥ ४९ ॥

ता एकशोऽथवा द्वित्राः काले काले व्रजेऽभवन् ।
प्राचीनाश्च नवाश्च स्युर्यौथिक्यस्ततो द्विधा ॥ ५० ॥

नित्यप्रियाभिः सालोक्यं प्राचीनाश्चिरमागताः ।
व्रजे जाता नवास्त्वेता मर्त्यामर्त्यादियोनितः ॥ ५१ ॥

अथ देव्यः

देवेष्वंशेन जातस्य कृष्णस्य दिवि तुष्टये ।
नित्यप्रियाणामंशास्तु या याता देवयोनयः ॥ ५२ ॥

अत्र देवावतरणे जनित्वा गोपकन्यकाः ।
ता अंशिनीनामेवासां प्रियसख्योऽभवन्व्रजे ॥ ५३ ॥

अथ नित्यप्रियाः

राधाचन्द्रावलीमुख्याः प्रोक्ताः नित्यप्रिया व्रजे ।
कृष्णवन्नित्यसौन्दर्यवैदग्ध्यादिगुणाश्रयाः ॥ ५४ ॥

तथा च ब्रह्मसंहितायां (5.48)

आनन्दचिन्मयरसप्रतिभाविताभिस्
ताभिर्य एव निजरूपतया कलाभिः ।
गोलोक एव निवसत्यखिलात्मभूतो
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५५ ॥

तत्र शास्त्रसिद्धास्तु राधा चन्द्रावली तथा ।
विशाखा ललिता श्यामा पद्मा शैब्या च भद्रिका ।
तारा विचित्रा गोपाली धनिष्ठा पालिकादयः ॥ ५६ ॥

चन्द्रावल्येव सोमाभा गान्धर्वा राधिकैव सा ।
अनुराधा तु ललिता नैतास्तेनोदिताः पृथक् ॥ ५७ ॥

लोकप्रसिद्धनाम्न्यस्तु खञ्जनाक्षी मनोरमा ।

मङ्गला विमला लीला कृष्णा शारी विशारदा।
तारावली चकोराक्षी शङ्करी कुङ्कुमादयः॥ ५८॥

इत्यादीनान्तु शतशो यूथानि व्रजसुभ्रुवाम्।
लक्षसङ्ख्यास्तु कथिता यूथे यूथे वराङ्गनाः॥ ५९॥

सर्वा यूथाधिपा एता राधाद्याः कुङ्कुमान्तिमाः।
विशाखां ललितां पद्मां शैब्याञ्च प्रोह्य कीर्तिताः॥ ६०॥

किन्तु सौभाग्यधौरेया अष्टौ राधादयो मताः।
यूथाधिपात्वेऽप्यौचित्यं दधाना ललितादयः।
स्वेष्टराधादिभावस्य लोभात्सख्यरुचिं दधुः॥ ६१॥

इति श्रीश्रीज्ज्वलनीलमणौ श्रीहरिप्रियाप्रकरणम्॥ ३॥

* The second half of this verse as found in the Padyāvalī:

पश्य स्तनस्तवकयोस्तव कण्टकाङ्कं
गोपः सुकण्ठि बत पश्यति जातकोपः॥ ३८॥